२२

युधिष्ठिरस्य प्रबोधः

प्रस्तावना

विषदूरीकरणमन्त्रस्य श्रवणेन विषधरः सर्पः विषं त्यक्त्वा नताननः भवति तथैव सभायां यदि कथाप्रसङ्गेन कस्यापि मुखात् युधिष्ठिरस्य कीर्तिं शृणोति स्म, तदैव दुर्योधनः अर्जुनस्य पराक्रमं स्मृत्वा हतदर्पो भवति स्म। एवं सर्वथा युधिष्ठिरं जेतुम् असमर्थः दुर्योधनः युधिष्ठिरे कपटं कर्तुं प्रवृत्तः आसीत्। ततश्च युधिष्ठिरस्य मुखात् चरेण ज्ञापितां समग्रां कथां श्रुत्वा द्रौपदी किम् अनुभूतवती किञ्च युधिष्ठिरस्य क्रोधं तथा उत्साहं वर्धयितुं किं किमपि उक्तवती इत्यादिकं सर्वं पाठेऽस्मिन् पठिष्यन्ति भवन्तः। शास्त्रज्ञेषु व्यवहारज्ञेषु च स्त्रीजनैः उक्तं किमपि वचनम् तिरस्कार इव भवति इति जानन्ती अपि द्रौपदी कथं युधिष्ठिरं प्रति किमपि कथयितुं प्रवृत्ता अभूत्, किञ्च तेन दुर्योधनेन वस्तुतः कः महान् दोषः कृतः इति ज्ञास्यन्ति पाठात् अस्मात्। मायाविषु सरलता न समुचिता इति द्रौपद्याः वचनस्य तात्पर्यं किम् आसीदिति विषये भवतां साधु बोधः भविष्यति।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- पद्यकाव्यस्य निर्माणं कथं करणीयम् इति ज्ञास्यति।
- श्लोकानाम् अन्वयः कथं कर्त्तव्यम् इत्यस्मिन् विषये शिक्षां प्रप्स्यति।
- द्रौपदी किमर्थम् उपदेष्टुं प्रवृत्ता इति स्पष्टं भविष्यति।
- चराणां वचने कः सारः भवतीति अज्ञानं दूरीभविष्यति।
- कैः साकं कथम् आचरणीयम् इति ज्ञानं प्राप्स्यति।

२२.१) मूलपाठः

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ।। १.२४ ।।

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः ।। १.२५ ।।

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ।। १.२६ ।।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनिगन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ।। १.२७ ।।

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ।। १.२८ ।।

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वया स्वहस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ।। १.२९ ।।

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ।। १.३० ।।

२२.२) साम्प्रतम् मूलपाठम् अवगच्छाम

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः सुदु सहान्मन्त्रपदादिवोरगः।।२४

अन्वयः - कथाप्रसङ्गेन जनैः उदाहृतात् तव अभिधानात् अनुस्मृताखण्डलसूनुविक्रमः नताननः सः (दुर्योधनः) सुदुःसहात् मन्त्रपदात् उरगः इव व्यथते।

अन्वयार्थः - कथाप्रसङ्गेन कथाप्रसङ्गेषु इनाः श्रेष्ठाः कथाप्रसङ्गेनाः जनाः तैः कथाप्रसङ्गेनजनैः विषवैद्यप्रवरलोकैः, अथवा कथायाः प्रसङ्गः कथाप्रसङ्गः तेन कथाप्रसङ्गेन वार्तानुक्रमेण जनैः लोकैः, उदाहृतात् उच्चारितात्, तव भवतः (युधिष्ठिरादेः), अभिधानात् नाम्नः, (अन्यपक्षे) तवाभिधानात् तश्च वश्च तवौ तार्क्षवासुकी तवयोः अभिधानं यस्मिन् तत् तवाभिधानं तस्मात् तार्क्ष्यवासुकिनामकथनात्, अनुस्मृताखण्डलसूनुविक्रमः आखण्डलस्य इन्द्रस्य सूनुः पुत्रः आखण्डलसूनुः, तस्य विक्रमः आखण्डलसूनुविक्रमः, अनुस्मृतः आखण्डलसूनुविक्रमः येन सः अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः, (अन्यपक्षे) अनुस्मृताखण्डलसूनुविक्रमः आखण्डलस्य इन्द्रस्य सूनोः अनुजस्य नारायणस्य विः पक्षी गरुडः, तस्य क्रमः पादविक्षेपः अनुस्मृतः चिन्तितः येन सः अनुस्मृताखण्डलसूनुविक्रमः स्मृतगरुडवेगः, नताननः नम्रमुखः, सः सिंहासनारूढः, दुर्योधनः सुदुःसहात् अतिदुःश्रवात्, मन्त्रपदात् विषदूरीकरणवाक्यविशेषात्, उरगः सर्पः, इव, व्यथते दुःखायते।

सरलार्थः - सभायां यदि कथाप्रसङ्गेन कस्यापि मुखात् युधिष्ठिरस्य कीर्तिं शृणोति, तदा दुर्योधनः भवतां विशेषस्य अर्जुनस्य पराक्रमं स्मृत्वा हतदर्पो भवति। यथा विषदूरीकरणमन्त्रस्य श्रवणेन विषधरः सर्पः विषं त्यक्त्वा नताननः भवति।

तात्पर्यार्थः - अस्मिन् श्लोके दुर्योधनस्य भीतिः निरूपिता महाकविना भारविना। विषवैद्यैः पठितं गरुडवासुकिनामयुक्तं मन्त्रम् श्रुत्वा सर्पः गरुडस्य प्रभावं मनसि चिन्तयित्वा नताननः तिष्ठति। एवं सभायां कथाप्रसङ्गेन केनापि उच्चारितं युधिष्ठिरस्य नाम श्रुत्वा भयेन व्याकुलो भवति। किञ्च अर्जुनस्य विक्रमं स्मृत्वा हतवीर्यः सः अधोवदनो भवति। "सर्वतो जयम् अन्विच्छेत् पुत्रात् इच्छेत् पराजयम्" इति न्यायात् अर्जुनस्य उत्कर्षकथनं युधिष्ठिरस्य भूषणम् एव।

व्याकरणविमर्शः -

- अनुस्मृताखण्डलसूबुविक्रमः - आखण्डलस्य सूनुः आखण्डलसूनुः, आखण्डलसूनोः विक्रमः आखण्डलसूनुविक्रमः, अनुस्मृतः आखण्डलसूनुविक्रमो येन सः अनुस्मृताखण्डलसूबुविक्रमः।
- तवाभिधानात्- तश्च वश्च तवौ तार्क्ष्यवासुकी तयोः अभिधानमिति तवाभिधानम्, तस्मात् तवाभिधानात्।
- नताननः - नतम् आननं यस्य स नताननः।
- व्यथते - व्यथ-धातोः लटि प्रथमपुरुषैकवचने रूपमिदम्।

सन्धिकार्यम्-

- मन्त्रपदादिवोरगः= मन्त्रपदात् + इव + उरगः।
- जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः = जनैः + उदाहृतात् + अनुस्मृताखण्डलसूनुविक्रमः।

प्रयोगपरिवर्तनम् -

- कथाप्रसङ्गेन जनैः उदाहृताद्, अनुस्मृताखण्डलसूनुविक्रमेण नताननेन तेन सुदुःसहात् मन्त्रपदाद् उरगेण इव तव अभिधानाद् व्यथ्यते।

अलङ्कारालोचना -

अत्र श्लोके उपमा अलङ्कारः उरग इव सः इति साम्यप्रतिपादनात्।

कोषः -

- अभिधानम् - "आख्याह्वे अभिधानं च नामधेयं च नाम च"इत्यमरः।

पाठगतप्रश्नाः-१

१. स दुर्योधनः किम् इव व्यथते।

२. दुर्योधनः कस्मात् व्यथते।

३. स च दुर्योधनः कीदृशः सन् व्यथते।

४. उरगः कस्मात् व्यथते।

५. तवाभिधानात् इत्यस्य किम् अर्थद्वयं सम्भवति।

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः।।२५

अन्वयः -तत् त्वयि जिह्मं कर्त्तुम् उद्यते तत्र विधेयम् उत्तरम् आशु विधीयताम्। परप्रणीतानि वचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु।

अन्वयार्थः - तत् तस्मात् कारणात्, त्वयि भवति युधिष्ठिरे, जिह्मं कपटम्, कर्तुं विधातुम्, उद्यते प्रवृत्ते, तत्र तस्मिन् दुर्योधने, विधेयं कर्तव्यम्, उत्तरं प्रतीकारः उपायः, आशु शीघ्रम्, विधीयताम् क्रियताम्। परप्रणीतानि परेण अन्येन प्रणीतानि उक्तानि परप्रणीतानि अन्योक्तानि, वचांसि वाक्यानि, चिन्वतां गवेषयताम्। मादृशाम् वनेचराणाम्, गिरः वाचः, प्रवृत्तिसाराः खलु वृत्तान्तमात्रप्रधानाः एव।

सरलार्थः - तस्मात् कारणात् भवति युधिष्ठिरे स दुर्योधनः कपटं कर्तुं प्रवृत्तः। अर्थात् त्वां निहन्तुम् इच्छति इत्यर्थः। अतः भवता करणीयः उपायः शीघ्रं क्रियताम्। यतः परोक्तानि वचनानि अन्वेषयतां दूतानाम् अस्माकं वचनानि वृत्तान्तप्रधानानि भवन्ति। अर्थात् मादृशाः अल्पबुद्धयः दूताः केवलं वार्ताभिज्ञाः न तु कार्याभिज्ञाः। अतः भवान् एव विचार्य समुचितं कर्म सम्पादयतु।

तात्पर्यार्थः - अस्मिन् श्लोके किरातः स्वसंदेशस्य सारांशं कथयति। यत् दुर्योधनः सर्वदा भवतः छिद्रान्वेषी भवन्तं जेतुम् इच्छति। अतः भवान् यथा तस्य पराजयः स्यात् तथा विचारयतु। कथं तस्य पराजयः स्याद् इति अहं तु वक्तुं समर्थो नास्मि। तद्यथा यथार्थकथनम् एव दूतानां प्रयोजनम्। तत्र विधेयं तु स्वामिनां कर्त्तव्यम् इति। अर्थात् यदत्र समयोचितं कृत्यं तत् भवता शीघ्रम् एव कर्त्तव्यम्।

व्याकरणविमर्शः -

- परप्रणीतानि - परैः प्रणीतानि इति परप्रणीतानि ।
- प्रवृत्तिसाराः - प्रवृत्तिरेव सारो यासां ताः प्रवृत्तिसाराः।
- विधीयताम् - वि-धा-धातोः यकि लोटि तिपि रूपमिदम्।

सन्धिकार्यम्-

- तदाशु = तत् + आशु।

प्रयोगपरिवर्तनम् -

तत् त्वयि जिह्मं कर्तुम् उद्यते तत्र विधेयम् उत्तरं विधेहि । परप्रणीतानि वचांसि चिन्वतां मादृशां गीर्भिः प्रवृत्तिसारभिः भूयते खलु।

कोषः -

- प्रवृत्तिः - "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्याद्" इत्यमरः।

पाठगतप्रश्नाः-२

६. दुर्योधनः किं कर्तुम् उद्यतः।

७. युधिष्ठिरेण दुर्योधने आशु किं विधीयताम्।

८. युधिष्ठिरः किं चिन्वताम्।

९. वनेचराणां गिरः कीदृशाः भवन्ति।

१०. जिह्मम् इत्यस्य कः अर्थः।

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम्।
प्रविश्य कृष्णा-सदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः।।२६

अन्वयः - अथ इति गिरम् ईरयित्वा गते आत्तसत्क्रिये वनसन्निवासिनां पत्यौ (सति) महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तद् वचः आचचक्षे।

अन्वयार्थः - अथ ततः तदनन्तरम्, इति इत्थं एवं रूपेण, गिरं वाचं वाणीम्, ईरयित्वा उक्त्वा, गते स्थानं प्रस्थिते, (तथा च) आत्तसत्क्रिये गृहीतपारितोषिके,वनसन्निवासिनाम् वनवासिनां वनेचराणाम्, पत्यौ स्वामिनि, सति (तदा) महीभुजा भूपतिना युधिष्ठिरेण, कृष्णासदनं द्रौपदीभवनम्, प्रविश्य अन्तर्गत्वा, अनुजसन्निधौ अनुजस्य भीमस्य सन्निधिः अनुजसन्निधिः तस्मिन् अनुजसन्निधौ भीमसमीपे, तत् वनेचरेण उक्तम्, वचः वाक्यम्, आचचक्षे उक्तम्। अथवा महीभुजा भूपतिना युधिष्ठिरेण, सदनं भवनम्, प्रविश्य अन्तर्गत्वा, अनुजस्य भीमस्य सन्निधिः अनुजसन्निधिः तस्मिन् अनुजसन्निधौ भीमसमीपे, तत् वनेचरेण उक्तम्, वचः वाक्यम्, कृष्णा द्रौपदी, आचचक्षे कथिता।

सरलार्थः - इत्थं वचनं युधिष्ठिराय निवेद्य सः वनेचरः पारितोषिकं च गृहीत्वा स्वगृहं प्रस्थितः। तदनन्तरं राजा युधिष्ठिरः द्रौपद्याः भवनं प्रविश्य भीमार्जुनादीनां स्वभ्रातृणां समीपे वनेचरेण उक्तं वचनम् आख्यातवान्। अथवा राजा दुर्योधनः भवनं प्रविश्य स्वभ्रातृणां पुरतः वनेचरेण उक्तं वचनम् आख्यातवान्।

तात्पर्यार्थः - दुर्योधनस्य सकलं वृत्तान्तं युधिष्ठिराय निवेद्य वनेचरः स्वकार्यं सम्पादितवान्। ततः युधिष्ठिरात् वनेचरःपारितोषिकं च प्राप्य स्वगृहं गतः। तदा युधिष्ठिरः अपि वनेचरेण प्रतिपादितं समाचारं भीमसमीपे स्थितां द्रौपदीं कथयितुं द्रौपद्याः भवनं गतः।

व्याकरणविमर्शः -

- आत्तसत्क्रिये - आत्ता (गृहीता) सत्क्रिया येन स आत्तसत्क्रियः तस्मिन् आत्तसत्क्रिये ।
- वनसन्निवासिनाम् - वने सन्निवसन्ति ये ते वनसन्निवासिनः, तेषां वनसन्निवासिनाम्।
- कृष्णासदनम्-कृष्णाया द्रौपद्याः सदनं कृष्णासदनम् ।
- ईरयित्वा - ईर-धातोः णिचि क्त्वा-प्रत्यये रूपमिदम्।
- आचचक्षे - आङ्-चक्षिङ्-धातोः लिटि रूपमिदम्।

सन्धिकार्यम्-

- गतेऽथ = गते + अथ।
- इतीरयित्वा = इति + ईरयित्वा।

प्रयोगपरिवर्तनम् -

- इति ईरयित्वा आत्तसत्क्रिये वनसन्निवासिनां पत्यौ गते महीभुक् कृष्णासदनं प्रविश्य, वा सदनं प्रविश्य अनुजसन्निधौ कृष्णां प्रति आचचक्षे।

कोषः -

- वनम्- "अटव्यरण्यं विपिनं गहनं काननं वनम्"इत्यमरः।

पाठगतप्रश्नाः-३

११. महीभुजा अनुजसन्निधौ किं कृतम्।

१२. तेन च कुत्र प्रविश्य एवं कृतम्।

१३. कस्मिन् गते तेन युधिष्ठिरेण वचः आचचक्षे।

१४. स च वनेचरः किं कृत्वा गतवान्।

१५. आत्तसत्क्रिये इत्यस्य कः अर्थः।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनिगन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः।।२७

अन्वयः - ततः द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्याः अपाकृतीः विनिगन्तुम् अक्षमा, (सती) नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार।

अन्वयार्थः - ततः तदनन्तरं युधिष्ठिरकथनानन्तरम्, द्रुपदात्मजा द्रुपदपुत्री द्रौपदी, द्विषतां शत्रुणां दुर्योधनप्रभृतीनाम्, सिद्धिम् समृद्धिम् उत्कर्षम्, निशम्य श्रुत्वा, ततस्त्याः ततः शत्रुभ्यः आगताः, अपाकृतीः अपकारान्. विनियन्तुं निरोद्धुम् अपनेतुम्, अक्षमा असमर्था सती, नृपस्य राज्ञः युधिष्ठिरस्य, मन्युव्यवसायदीपिनीः मन्युः क्रोधः व्यवसायः उद्यमः तयोः दीपिनीः समुत्पादिकाः मन्युव्यवसायदीपिनीः क्रोधोद्यमसंवर्धिनीः, गिरः वचनानि, उदाजहार उक्तवती।

सरलार्थः - युधिष्ठिरस्य कथनानन्तरं शत्रूणां कौरवाणां समृद्धिं युधिष्ठिरस्य मुखाद् एव श्रुतवती। ततः शत्रूणां कौरवाणां कारणात् प्राप्तं दुःखं किञ्च दुःखाद् अपि उत्पन्नं मानसिकविकारं निरोद्धुं असमर्था सत्यपि युधिष्ठिरस्य क्रोधं तथा उत्साहं वर्धयितुं वचनानि उक्तवती।

तात्पर्यार्थः - अस्मिन् श्लोके महाकविः भारविः द्रौपदीमुखेन युधिष्ठिरस्य यथा क्रोधोद्दीपनं भवेत् तथा वचनानि कथयति। तथाहि युधिष्ठिरस्य मुखात् शत्रोः दुर्योधनस्य समृद्धिं श्रुतवती। तच्छ्रवणेन च क्षुब्धहृदया सा द्रौपदी दुर्योधनेन कृतान् अपकारान् स्मरन्ती युधिष्ठिरं प्रति एवंभूतां वाचम् उक्तवती। यथा तस्य युधिष्ठिरस्य क्रोधः वर्धेत अपि च दुर्योधनस्य उन्मूलनाय प्रयतेत।

व्याकरणविमर्शः -

- द्रुपदात्मजा - द्रुपदस्य आत्मजा द्रुपदात्मजा।
- मन्युव्यवसायदीपिनीः - मन्युश्च व्यवसायश्च मन्युव्यवसायौ, तौ दीपयन्ती इति मन्युव्यवसायदीपिन्यः, ताः मन्युव्यवसायदीपिनीः।
- निशम्य – नि-शम्-धातोः क्त्वोः ल्यपि रूपमिदम्।
- उदाजहार – उत्- आ-हृ-धातोः लिटि प्रथमपुरुषैकवचने रूपमिदम्।

सन्धिकार्यम्-

- अपाकृतीस्ततस्ततस्त्याः = अपाकृतीः + ततः + ततस्त्याः।
- मन्युव्यवसायदीपिनीरुदाजहार =मन्युव्यवसायदीपिनीः + उदाजहार।

प्रयोगपरिवर्तनम् -

द्विषतां सिद्धिं निशम्य, ततः ततस्त्या अपाकृतीः विनियन्तुम् अक्षमया द्रौपद्या नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजह्रिरे।

अलङ्कारालोचना -

- अत्र व्यञ्जनस्य तकारस्य असकृत् उच्चारणात् वृत्त्यनुप्रासः अलङ्कारः।

कोषः -

- गीः - "ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती"इत्यमरः।

पाठगतप्रश्नाः-४

१६. का गिरः उदाजहार।

१७. सा च कदा गिरः उदाजहार।

१८. सा किं निशम्य एवं कृतवती।

१९. सा कीदृश्यः गिरः उदाजहार।

२०. सा द्रौपदी किं कर्तुम् अक्षमा।

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।२८

अन्वयः - (यद्यपि) भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपः इव भवति। तथाऽपि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति ।

अन्वयार्थः - भवादृशेषु भवद्विधेषु सर्वज्ञेषु, प्रमदाजनोदितम् प्रमदाः स्त्रियः एव जनाः प्रमदाजनाः, तैः उदितं कथितम् प्रमदाजनोदितम् स्त्रीजनकथितम्, अनुशासनम् सदुपदेशवचनम्, अधिक्षेपः आक्षेपः तिरष्कारः इति वा, इव तद्वत्, भवति स्यात् । तथापि दुर्वचत्वेऽपि, निरस्तनारीसमया निरस्ताः निराकृताः नारीणां समयाः आचाराः निरस्तनारीसमयाःनिराकृतस्त्रीशीलाः, दुराधयः दुः दुष्टाः आधयः मनोव्यथाः दुष्टमनोव्यथाः, मां द्रौपदीम्,वक्तुम् कथयितुम्, व्यवसाययन्ति प्रेरयन्ति।

सरलार्थः - भवादृशेषु शास्त्रज्ञेषु व्यवहारज्ञेषु च स्त्रीजनैः उक्तं किमपि वचनम् भवतः तिरस्कार इव भवति। तथापि शत्रुकृतैः अवमाननाभिः मनोव्यथाभिः च अहं द्रौपदी अत्यन्तं क्षुब्धहृदया अस्मि। अत एव स्त्रीजनोचितं धैर्यविनयादिकम् आचारं विहाय भवते किञ्चित् कथयामि।

तात्पर्यार्थः - प्रस्तुते अस्मिन् श्लोके द्रौपद्याः हृदये प्रज्वलितस्य भयंकरस्य प्रतिशोधस्य या भावना उत्पन्ना तस्याः प्रतिध्वनिः प्राप्तः। पण्डितान् प्रति उपदेशवचनम् अपमानं प्रदर्शयति, तत् पुनः स्त्रीजनानाम् अनौचित्यम् एव। शत्रुभिः कौरवैः जनितेन दुःखेन अभिभूता द्रौपदी सन्तप्ता। किञ्च, ताः दुष्टाः मनोव्यथाः युधिष्ठिरं प्रति सर्वं कथयितुं तां द्रौपदीं प्रेरयन्ति।

व्याकरणविमर्शः -

- भवादृशेषु - भवन्त इव दृश्यन्ते इति भवादृशाः, तेषु भवादृशेषु ।
- प्रमदाजनोदितम् - प्रमदा एव जनः प्रमदाजनः, तेन उदितं प्रमदाजनोदितम् इति तृतीयातत्पुरुषः।
- निरस्तनारीसमयाः - नार्यः समयाः नारीसमयाः इति षष्ठीतत्पुरुषः। निरस्ताः नारीसमयाः यैः, ते निरस्तनारीसमयाः इति बहुव्रीहिसमासः।
- अनुशासनम् - अनु-शास्-धातोः ल्युट्-प्रत्यये रूपमिदम्।

- व्यवसायन्ति - वि-अव-षो-धातोः णिचि लटि प्रथमपुरुषबहुवचने रूपमिदम्।

सन्धिकार्यम्-

- भवत्यधिक्षेपः = भवति + अधिक्षेपः।
- इवानुशासनम् = इव + अनुशासनम्।

प्रयोगपरिवर्तनम् -

भवादृशेषु प्रमदाजनोदितेन अनुशासनेन अधिक्षेपेण इव भूयते । तथाऽपि निरस्तनारीसमयैः दुराधिभिः अहं वक्तुं व्यवसाय्ये।

अलङ्कारालोचना -

- अत्र अनुशासनम् अधिक्षेप इव इति साम्यप्रतिपादनात् उपमा अलङ्कारः।

कोषः -

- आधिः - "पुंस्याधिर्मानसी व्यथा"इत्यमरः।

पाठगतप्रश्नाः-५

२१. भवादृशेषु किम् अधिक्षेपः इव भवति।

२२. के व्यवसाययन्ति।

२३. ते च दुराधयः कां किमर्थं व्यवसाययन्ति।

२४. प्रमदाजनोदितम् अनुशासनम् कुत्र अधिक्षेप इव भवति।

२५. अधिक्षेपः इत्यस्य कः अर्थः।

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवाऽपवर्जिता।।२९

अन्वयः - आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डं धृता मही मदच्युता मतङ्गजेन, स्रक् इव त्वया आत्महस्तेन अपवर्जिता।

अन्वयार्थः - आखण्डलतुल्यधामभिः आखण्डलस्य इन्द्रस्य तुल्यं समानं धाम तेजः येषां तैः आखण्डलतुल्यधामभिः इन्द्रसमतेजोभिः, स्ववंशजैः निजपूर्वजैः, निजकुलजैः वा । भूपतिभिः भूपैः भरतादिभिः इत्यर्थः । चिरं दीर्घकालम्, अखण्डम् सम्पूर्णम्, यथा स्यात्तथेति क्रियाविशेषणम् । धृता धारिता, मही पृथिवी, मदच्युता मदं दानजलं क्षरति इति मदच्युत् तेन मदच्युता मदस्राविणा, मतङ्गजेन मातङ्गेन, मत्तेन हस्तिनेति भावः । स्रक् माल्यम्, इव, त्वया युधिष्ठिरेण, आत्महस्तेन स्वकरेण; (द्यूतविधाविधौ) अपवर्जिता त्यक्ता।

सरलार्थः - इन्द्रसदृशपराक्रमाः भवतः वंशजाः दीर्घकालं यावत् सम्पूर्णा भूमिरियं वशीकृता आसीत्। किन्तु सा भवतः हस्तेनैव विनाशिता। यथा मदमत्तः हस्ती स्वकण्ठात् माल्यम् दूरीकरोति।

तात्पर्यार्थः - अस्मिन् श्लोके द्रौपदीमुखेन कविः कथयति यत् स्वेषां चापल्येन एव तैः धरा इयं विनाशिता। अतः विपत्तिः सा न हि दैवीकृता इति तस्याः कथनस्य अभिप्रायः। इन्द्रसमप्रभावैः स्ववंशजैः भरतादिभिः चिरकालं पृथिवी इयं धृता आसीत्। किन्तु सा पृथिवी इदानीं युधिष्ठिरेण स्वकीयकरेण परित्यक्ता। मदजलस्राविणा प्रमत्तेन गजेन यथा पुष्पमाल्यम् परित्यक्तं भवति।

व्याकरणविमर्शः -

- आखण्डलतुल्यधामभिः - आखण्डलेन तुल्यं धाम येषां ते आखण्डलतुल्यधामानः इति बहुव्रीहिसमासः, तैः आखण्डलतुल्यधामभिः।
- स्ववंशजैः - स्वस्य वंशः स्ववंशः, स्ववंशाज्जायन्ते इति स्ववंशजाः, तैः स्ववंशजैः।
- धृता - धृ-धातोः क्त-प्रत्यये स्त्रियां रूपमिदम्।
- अपवर्जिता - अप-वृज्-धातोः क्त-प्रत्यये स्त्रियां रूपमिदम्।

सन्धिकार्यम्-

- आखण्डलतुल्यधामभिश्चिरम् = आखण्डलतुल्यधामभिः + चिरम्।
- स्रगिव = स्रक् + इव।

प्रयोगपरिवर्तनम् -

- आखण्डलतुल्यधामभिः स्ववंशजैः चिरम् अखण्डं धृत्वा महीं मदच्युतः मतङ्गजस्य स्रक् इव त्वम् आत्महस्तेन अपवर्जितवान्।

अलङ्कारालोचना -

- अत्र मतङ्गजेन इव त्वया स्रगिव अपवर्जिता इति साम्यप्रतिपादनात् पूर्णोपमा अलङ्कारः।

कोषः -

- मतङ्गजः - "मतङ्गजो गजो नागः कुञ्जरो वारणः करी"इत्यमरः।

पाठगतप्रश्नाः-६

२६. कैः मही चिरम् अखण्डं धृता।

२७. ते च कीदृशाः।

२८. सा मही केन अपवर्जिता।

२९. सा च कथम् अपवर्जिता।

३०. आखण्डलतुल्यधामभिः इत्यस्य कः अर्थः।

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः।।३०

अन्वयः - ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति। शठाः तथाविधान् असंवृताङ्गान् निशिता इषवः इव प्रविश्य घ्नन्ति।

अन्वयार्थः - ये केचन जनाः,मायाविषु मायावत्सु कपटिषु, मायिनः कपटिनः, न भवन्ति, (ते अमायिनः), मूढधियः मन्दबुद्धयः, पराभवम् पराजयम् अपमानम्, व्रजन्ति यान्ति प्राप्नुनवन्ति। हि यतः, शठाः मायिनः धूर्ताः, तथाविधान् तादृशान्, असंवृताङ्गान् असंवृतम् अनाच्छादितम् अङ्गं शरीरं येषां तान् असंवृताङ्गान् कवजादिना अरक्षितदेहान्, निशिताः तीक्ष्णीकृताः, इषवः बाणाः, इव, प्रविश्य अन्तःप्रविश्य, घ्नन्ति मारयन्ति विनाशयन्ति।

सरलार्थः - ये पुरुषाः मायावन्तः कपटपूर्णाः न भवन्ति ते पुरुषाः सर्वत्र पराजयं प्राप्नुवन्ति। यतः कुटिलपुरुषाः आत्मीयाः भूत्वा तादृशान् सरलान् विनाशयन्ति। यथा कवजादिभिः अरक्षितान् देहान् प्रविश्य तीक्ष्णाः शराः देहान् नाशयन्ति। अतः मायाविषु सरलता न समुचिता।

तात्पर्यार्थः - अस्मिन् श्लोके महाकविना प्रतिपाद्यते यत् आर्जवं हि कुटिलेषु न नीतिः। शठे शाठ्यम् एव आचरेत् इति नीतिः। तथाहि मूढधियां तेषां सदैव पराजयो भवति ये कपटिषु कपटं न कुर्वन्ति। यथा युद्धे तीक्ष्णाः बाणाः कवजरहितान् देहान् शीघ्रमेव अन्तः प्रविश्य नाशयन्ति। तथैव ते मायाविनः धूर्ताः सरलानां जनानां निखिलान् अन्तर्भावान् विज्ञाय तान् नाशयन्ति।

व्याकरणविमर्शः -

- मूढधियः - मूढा धीर्येषां ते मूढधियः इति बहुव्रीहिसमासः।
- असंवृताङ्गान् - न संवृतानि असंवृतानि इति नञ्तत्पुरुषसमासः, असंवृतानि अङ्गानि येषां ते असंवृताङ्गाः इति बहुव्रीहिसमासः, तान् असंवृताङ्गान्।
- घ्नन्ति - हन्-धातोः लटि प्रथमपुरुषबहुवचने रूपमिदम्।

सन्धिकार्यम्-

- शठास्तथाविधान् = शठाः + तथाविधान्।
- इवेषवः = इव + इषवः।

प्रयोगपरिवर्तनम् -

- यैः मायाविषु मायिभिः न भूयते, तैः मूढधीभिः पराभवो व्रज्यते । शठैः प्रविश्य निशितैः इषुभिरिव तथाविधाः असंवृताङ्गाः हन्यन्ते।

अलङ्कारालोचना -

- अत्र शठाः निशिताः इषवः इव इति साम्यप्रतिपादनात् उपमा अलङ्कारः।

कोषः -

- शठः - "निकृतस्त्वनृजुः शठ"इत्यमरः।

पाठगतप्रश्नाः-७

३१. मूढधियः के।

३२. ते च किं व्रजन्ति।

३३. शठाः कान् प्रविश्य घ्नन्ति।

३४. ते च शठाः तान् किम् इव प्रविश्य घ्नन्ति।

३५. निशिताः इषवः इत्यस्य कः अर्थः।

पाठसारः

सभायां यदि कथाप्रसङ्गेन कस्यापि मुखात् युधिष्ठिरस्य कीर्तिं शृणोति, तदा दुर्योधनः भवतां विशेषस्य अर्जुनस्य पराक्रमं स्मृत्वा हतदर्पो भवति। यथा विषदूरीकरणमन्त्रस्य श्रवणेन विषधरः सर्पः विषं त्यक्त्वा नताननः भवति। तस्मात् कारणात् भवति युधिष्ठिरे स दुर्योधनः कपटं कर्तुं प्रवृत्तः। अर्थात् त्वां निहन्तुम् इच्छति इत्यर्थः। अतः भवता करणीयः उपायः शीघ्रं क्रियताम्। यतः परोक्तानि वचनानि अन्वेषयतां दूतानाम् अस्माकं वचनानि वृत्तान्तप्रधानानि भवन्ति। अर्थात् मादृशाः अल्पबुद्धयः दूताः केवलं वार्ताभिज्ञाः न तु कार्याभिज्ञाः। अतः भवान् एव विचार्य समुचितं कर्म सम्पादयतु। इत्थं वचनं युधिष्ठिराय निवेद्य सः वनेचरः पारितोषिकं च गृहीत्वा स्वगृहं प्रस्थितः। तदनन्तरं राजा युधिष्ठिरः द्रौपद्याः भवनं प्रविश्य भीमार्जुनादीनां स्वभ्रातृणां समीपे वनेचरेण उक्तं वचनम् आख्यातवान्। अथवा राजा दुर्योधनः भवनं प्रविश्य स्वभ्रातृणां पुरतः वनेचरेण उक्तं वचनम् आख्यातवान्। युधिष्ठिरस्य कथनानन्तरं शत्रूणां कौरवाणां समृद्धिं युधिष्ठिरस्य मुखाद् एव श्रुतवती। ततः शत्रूणां कौरवाणां कारणात् प्राप्तं दुःखं किञ्च दुःखाद् अपि उत्पन्नं मानसिकविकारं निरोद्धुं असमर्था सत्यपि युधिष्ठिरस्य क्रोधं तथा उत्साहं वर्धयितुं वचनानि उक्तवती। भवादृशेषु शास्त्रज्ञेषु व्यवहारज्ञेषु च स्त्रीजनैः उक्तं किमपि वचनम् भवतः तिरस्कार इव भवति। तथापि शत्रुकृतैः अवमाननाभिः मनोव्यथाभिः च अहं द्रौपदी अत्यन्तं क्षुब्धहृदया अस्मि। अत एव स्त्रीजनोचितं धैर्यविनयादिकम् आचारं विहाय भवते किञ्चित् कथयामि। इन्द्रसदृशपराक्रमाः भवतः वंशजाः दीर्घकालं यावत् सम्पूर्णा भूमिरियं वशीकृता आसीत्। किन्तु सा भवतः हस्तेनैव विनाशिता। यथा मदमत्तः हस्ती स्वकण्ठात् माल्यम् दूरीकरोति। ये पुरुषाः मायावन्तः कपटपूर्णाः न भवन्ति ते पुरुषाः सर्वत्र पराजयं प्राप्नुवन्ति। यतः कुटिलपुरुषाः आत्मीयाः भूत्वा तादृशान् सरलान् विनाशयन्ति। यथा कवजादिभिः अरक्षितान् देहान् प्रविश्य तीक्ष्णाः शराः देहान् नाशयन्ति। अतः मायाविषु सरलता न समुचिता।

पाठान्तप्रश्नाः

१. युधिष्ठिराणां कीर्तिं श्रुत्वा दुर्योधनस्य का दशा भवतीति वर्ण्यताम्।

२. द्रौपदी युधिष्ठिरम् उत्साहयितुं कदा किं कृतवती।

३. द्रौपदी कथं वक्तुं प्रेरिता।

४. युधिष्ठिरेण कथं मही अपवर्जिता इति द्रौपदीवचनानुसारं वर्णयत।

५. ये मायाविषु मायिनः न भवन्ति तेषां दशा वर्ण्यताम्।

६. समानार्थकानि धातुरूपाणि मेलयत।

क-स्तम्भः	**ख-स्तम्भः**
१. उदाजहार	क. त्यक्ता।
२. व्यथते	ख. याति।
३. अपवर्जिता	ग उक्तवती।
४. घ्नन्ति	घ गवेषयताम्।
५. व्रजति	ङ. विनाशयन्ति।
६. विधीयताम्	च. दुःखायते।
७.व्यवसाययति	छ. कथिता।
८. आचचक्षे	ज. प्रेरयति।

उत्तराणि - १-ग, २-च, ३-क, ४-ङ, ५-ख, ६-घ, ७-ज, ८- छ।

किमधिगतम्

१) मायाविषु सरलता न समुचिता।

२) दूतानां वार्ता प्रवृत्तिसारा भवति।

३) स्त्रीणाम् उपदेशः कीदृशो भवतीति ज्ञातम्।

४) कवेः प्रतिभा कीदृशी भवतीति स्पष्टमभूत्।

५) पद्यानि कथं छन्दोबद्धानि भवन्ति इति स्पष्टम्।

योग्यताविस्तारः

महाकविः भारविः

जीवनवृत्तान्तः

भारवेः जीवनवृत्तविषये निश्चितरूपेन तथा किमपि वक्तुं न शक्यते, गदसिंहनामकः किरातार्जुनीयस्य जनैकः टीकाकर्ता स्वस्य टीकायाः प्रारम्भे उल्लिखितवान्- "कविकुञ्जरो भारविः प्राणदेवापरनामधेयः किरातार्जुनीयकाव्यं प्रणिनीषुस्तल्लक्षणं वस्तुनिर्देशं प्रणयन्नाह" इति, एतेन प्रतीयते यत् प्राणदेवः भारवेः वास्तविको नाम किञ्च प्रखरप्रतिभाकारणात् भारविः इति नाम्ना स प्रसिद्धः आसीत्।

कृतिः

भारवेः एकैव रचना अधुना उपलब्धा वर्तते सा च 'किरातार्जुनीयम्' इति। एवं सामर्थ्यशाली सिद्धसरस्वतीकः कविः एकमेव ग्रन्थं रचितवान् इति तु कल्पयितुमेव न शक्यते यतो हि कालकवलिते संस्कृतसाहित्ये यथा कतिपयानां अमरकविनामेव नाममात्रमवशिष्यते तथैव अस्यापि तावत् एका एव कृतिः प्रकाशिता। यद्यपि एषैव तस्य अमरत्वसाधने पर्याप्ता। अपि च भारविविषयकः कतिपयो मुक्तकोऽपि प्राप्यते, यथा श्रीधरादासप्रणीते सदुक्तिकर्णामृते उक्तं–

सोद्वेगं करिकृत्तिवाससि भवद्व्रीडन्वितं ब्रह्मणि त्रैलोक्यैक-गुरावनादरवलत्तारं शचीभर्तरी। त्रासामीलितपक्ष्मभासविलसत्प्रेमप्रसन्नं हरौ क्षीरोदोत्थितया धिया विनिहितं चक्षुः शिवायास्तु वः।। इति।

रचनाशैली

महाकवेः भारवेः रचना लोके एवं प्रसिद्धा यत् तस्य रचना संस्कृतकाव्यानां बृहत्त्रयीषु गण्यते। अर्थगौरवं तस्य रचनाशैल्याः मुख्यस्तम्भः, यच्च भारवेरर्थगौरवम् इति वचनादेव स्पष्टं भवति। शिशिरस्य समयः समागतः इति क्षुद्रं वाक्यं कविना इत्थं प्रकटितम् -

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः।
सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः।। इति।

अस्य अर्थो भवति - अथ कामदेवस्य अद्वितीयं मित्रम्, वसन्तागमनस्य सूचकः, हेमन्तस्य अन्तकारी, आम्रकुसुमशोभया रमणीयः, सिन्दुवारप्रकाशितपुष्पैः सुशोभितः शिशिरर्तुः समागतः इति।

संस्कृतसाहित्ये किरातार्जुनीयस्य न्यूनातिन्यूनं सप्तत्रिंशत्(३७) टीकाः विरचिताः। यासु मल्लिनाथस्य घंटापथ-टीका सर्वश्रेष्ठा। १९१२ ख्रिस्ताब्दे कार्ल कैप्पलर महोदयः हारवर्ड ओरियेंटल सीरीज इत्यस्य अन्तर्गतस्य किरातार्जुनीयस्य जर्मन-भाषया अनुवादम् अकार्षीत्। आङ्गलभाषायामपि अस्य भिन्न-भिन्न-भागानां षडाधिकाः अनुवादाः कृताः।

कुरुक्षेत्रम् - हरियाणा-राज्यस्य प्रमुखं मण्डलं तथा तसय् मुख्यालयः वर्तते। स्थानमिदं हरियाणा-राज्यस्य उत्तरस्यां दिशि वर्तते। तथा च देहली-अमृतसर-स्थानयोः संयोजके राष्ट्रियराजमार्गे

रेलमार्गे च स्थानमिदम् अवस्थितम्। हिन्दूनां तीर्थस्थलरूपेण एतत् स्थानम् अतीव महत्वपूर्णम् अस्ति। एवं विश्वासः वर्तते यद् - महाभारतयुद्धम् अस्मिन्नेव स्थले अभवत् किञ्च भगवान् श्रीकृष्णः अस्मिन् क्षेत्रे एव अर्जुनं प्रति गीताम् उपदिष्टवान्।अस्य पौराणिकं माहात्म्यम् इतोपि अधिकं वर्तते। स्थानमिदं ऋग्वेदे तथा यजुर्वेदे वर्णितमस्ति। अत्र विद्यमानायाः नद्याः सरस्वत्याः अपि अत्यन्तं माहात्म्यं वर्तते।

द्वैतवनम् - स्थानमिदं मेरठ-प्रदेशात् उत्तरस्यां प्रायः विंशतियोजनदूरे अवस्थितम्, तच्च देववन्दः इत्युच्यते। उत्तरप्रदेशस्य सहारपुरमण्डलान्तर्गतमिदं स्थानम्। वनमिदं कालीनद्याः पूर्वापरदिशयोः योजनपरिमितं स्थानं व्याप्य दशयोजनदूरे अवस्थित. सत् मजफ्फर-नगरं विस्तीर्णम्। एवं हि श्रूयते यत् - मीमांसादीनां प्रवर्तकस्य महर्षेः जैमिनेः अपि जन्मभूमिः द्वैतवनमिदम्।

२२.३) सन्दर्भग्रन्थसूची

- महाकविः भारविः। किरातार्जुनीयम् (मल्लिनाथ-कृत-घण्टापथव्याख्यया श्रीजनार्दनपाण्डेयकृतया विवृत्या, हिन्दीभाषानुवादेन च समन्वितम्)। १९८४। मोतीलाल बनारसीदास।
- महाकविः भारविः। किरातार्जुनीयम् (घण्टापथ-सुधा-हिन्दीव्याख्योपेतम्)। २००४। चौखम्बा संस्कृत संस्थान। वाराणसी।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. उरगः इव।

२. कथाप्रसङ्गेन जनैः उदाहृतात् तव अभिधानात्।

३. अनुस्मृताखण्डलसूनुविक्रमः नताननः।

४. सुदुःसहात् मन्त्रपदात्।

५. तव तार्क्ष्यवासुक्योः वा नामकथनात्।

उत्तराणि-२

६. जिह्मं कर्त्तुम्।

७. विधेयम् उत्तरम्।

८. परप्रणीतानि वचांसि।

९. प्रवृत्तिसाराः।

१०. कपटम्।

उत्तराणि-३

११. वचः आचचक्षे।

१२. कृष्णासदनं प्रविश्य।

१३. आत्तसत्क्रिये वनसन्निवासिनां पत्यौ गते।

१४. वचनम् ईरयित्वा।

१५. गृहीतपारितोषिके।

उत्तराणि-४

१६. द्रुपदात्मजा द्रौपदी।

१७. युधिष्ठिरस्य कथनानन्तरम्।

१८. द्विषतां सिद्धिं निशम्य।

१९. नृपस्य मन्युव्यवसायदीपिनीः गिरः।

२०. शत्रुभ्यः आगताः अपाकृतीः विनिगन्तुम्।

२१. उत्तराणि-५

२२. प्रमदाजनोदितम् अनुशासनम्।

२३. निरस्तनारीसमयाः दुराधयः।

२४. द्रौपदीम्, वक्तुम्।

२५. भवादृशेषु सर्वज्ञेषु।

२६. तिरष्कारः।

उत्तराणि-६

२७. युधिष्ठिरस्य वंशजैः।

२८. आखण्डलतुल्यधामानः भूपतयः।

२९. युधिष्ठिरेण स्वहस्तेन।

३०. मत्तगजेन अपवर्जिता स्रक् इव।

३१. इन्द्रसदृशतेजोभिः।

उत्तराणि-७

३२. ये मायाविषु मायिनः न भवन्ति।

३३. पराभवम्।

३४. तथाविधान् मूढधियः।

३५. असंवृताङ्गान् निशिताः इषवः इव।

३६. तीक्ष्णीकृताः बाणाः।

॥ इति द्वाविंशः पाठः ॥